दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणकृष्णामावस्या
श्रावण 27 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-7 ■ वर्ष-5 ■ अङ्क-293 | 1 | अगस्त 12, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 राष्ट्रमण्डल-खड्गचालनं प्रतियोगितायां भारतेन १७ पदकानि जितानि

3 सुन्दरसिंहठाकुरः मन्त्री भविष्यति! प्रियंका गान्धी शिमलाम् आगन्तुं शक्नोति, फलोत्पादकेभ्यः प्राप्तम् इदम् आश्वासनम्

7 पाटलिपुत्र-ग्रीनफील्ड-सैटेलाइट-नगरिकायाम् ६५१ एकड्-परिमिते क्षेत्रे क्रीडा-केन्द्रस्य (स्पोर्ट्स हब) विकासः भविष्यति

## ससदःप्रावृट्सत्रम् २०२६-: संसदा 'अधिकरण-परिष्कार-विधेयकं, २०२६' अनुमोदितम्




हिमसंस्कृतवार्ता। संसदा 'अधिकरण-परिष्कार-विधेयकं, २०२६' पारितम्। राज्यसभया अद्य विधेयकस्यास्यानुमोदनमङ्गीकृतम्, यत् लोकसभया पूर्वमेव पारितम् आसीत्। विधि-न्याय राज्यमन्त्री अर्जुन-राम-मेघवालः एतत् विधेयकं उपस्थापितवान्। अस्य विधेयकस्य मुख्यम् उद्देश्यं तावत् विविधाधिकरणानां अध्यक्षानां सदस्यानाञ्च अर्हतासु, नियुक्तौ, सेवा-नियमेषु तथा अधिकरणानां प्रशासने कार्य-प्रणाल्याञ्च दक्षताम्, स्वायत्ततताम्, पारदर्शिताम्, एकरूपताञ्च आनेतुम् अस्ति। चर्चायाः प्रत्युत्तरे सती मेघवालेन उक्तं यत् प्रधानमन्त्रणः नरेन्द्र मोदिनः नेतृत्वे सर्वकारेण पंचविंशत्यधिकद्विसहस्र तमे वर्षे अधिकरणानां युक्तीकरणस्य प्रक्रिया आरब्धा आसीत्। मन्त्रिणा प्रोक्तं यत् अस्मिन् नूतन विधेयके 'राष्ट्रीय-अधिकरण-आयोगस्य' स्थापनायाः प्रावधानम् अस्ति, यस्य अध्यक्षता सर्वोच्च न्यायालयस्य पूर्व-न्यायाधीशः उत उच्च न्यायालयस्य पूर्व-मुख्य-न्यायाधीशः करिष्यति। विधेयक-पारणात् परं सदने विशेष-उल्लेखानां विषयेभ्यः समयः कल्पितः, यस्मिन् विविध-सदस्यैः लोक-महत्त्वस्य विषयाः उत्थापिताः। कार्य-समाप्त्यनन्तरं पीठासीन अधिकारिणा सदनस्य कार्याचरणं अद्य प्रातः एकादश-वादनं यावत् स्थगिता।

### लोकसभया 'केरल (नाम-परिवर्तनं) विधेयकं पारितम्

लोकसभया 'केरल (नाम-परिवर्तनं) विधेयकं पारितम्। अस्मिन् विधेयके संविधानस्य प्रथम-अनुसूच्यां राज्यस्य 'केरल' इति नाम परिवर्त्य 'केरलम्' इति कर्तुं प्रावधानम् अस्ति। अस्य विधेयकस्य विषये भाषमाणः गृह राज्यमन्त्री नित्यानन्द-रायः अवदत् यत् गतवर्षे केरल विधानसभया राज्यस्य नाम 'केरलम्' इति कर्तुं केन्द्र-सर्वकाराय अनुरोध-प्रस्तावः पारितः आसीत्। तेन उक्तं यत् मलयाळम्-भाषायां राज्यस्य नाम 'केरलम्' इति अस्ति, यदा तु संविधाने एतत् 'केरल' इति लिखितम् आसीत्। राज्यसभया 'राष्ट्रीय-सहकारिता-विकास-निगम (संशोधन) विधेयकं, अपि पारितम्। सहकारिता-राज्यमन्त्री मुरलीधर-मोहोल् - इत्यनेन उपस्थापितं विधेयकं निगमस्य गतिविधीन् औद्योगिक-पण्येषु अपि विस्तारयितुं अनुमतिं ददाति। उभे अपि विधेयके नीट्-विप्रतिपत्तिं अधिकृत्य विपक्षस्य कोलाहल-मध्ये चर्चा विनैव पारिते।

### झारखण्ड-राज्ये छात्रान् विरुध्य आरक्षकाणां बलप्रयोग-प्रकरणे एन.डी.ए संयुतेः पथसञ्चलनम्

झारखण्ड-राज्ये छात्रान् विरुध्य आरक्षकाणां बलप्रयोग-प्रकरणे एन०डी०ए०-संयुतेः सांसदाः संसद्-परिसरे पथसञ्चलनं अकुर्वन्। सांसदाः करेषु फलकानि धृतवन्तः, येषु आरोपः आसीत् यत् सर्वकारस्य आश्वासनानन्तरमपि विपक्षः चर्चा परिहरति। पथसञ्चलनमिदं 'मङ्गल-मिलन' इति एन०डी०ए०-संसदीय दलस्य उपवेशनात् परम् अभवत्। केन्द्रीय-मन्त्री अनुप्रिया पटेलः विपक्षं संसद् कार्याचरणे बाधाम् उत्पादयितुम् आरोपितवती। वार्ताहरैः सह सम्भाषमाणा सा प्रावोचत् यत् विपक्षस्य याचनाः स्वीकृताः तथापि विपक्षीय-दलानि चर्चायै तत्पराणि नैव सन्ति । अपरतः, काङ्ग्रेस-सांसद् पवन खेड़ा अपि प्रत्यारोपितवान् यत् अस्मिन् प्रकरणे गृह-मन्त्री स्वकीय-वक्तव्य-प्रदानात् पलायनं करोति ।

### भारत-नामीबिया-संयुक्त-व्यापार-समित्याः चतुर्थं सत्रम् नवदेहल्यां संपन्नम्

नवदेहली,हिमसंस्कृतवार्ता । भारत-नामीबिया-संयुक्त-व्यापार-समित्याः (JTC) चतुर्थं सत्रम् नवदेहल्यां संपन्नम्। वाणिज्य-उद्योग-मन्त्रालयेन सूचितं यत् उपवेशने उभौ पक्षौ द्विपक्षीयव्यापारम् अपक्ववस्तोः आधारित-संरचनातः प्रवर्धयन् नामीबिया-अन्तर्गतं मूल्यवर्धनस्य दिशि नेतुं बलम् दत्तवन्तौ। अस्याः चर्चायाः निश्चितसमयावधौ निर्धारितैः उत्तरदायित्वैः सह एकस्य कठोर-तन्त्रस्य रूपेण परिवर्तनस्य आवश्यकतायामपि बलम् दत्तम्।



## अद्यतनीयं सुभाषितम्

कार्यमित्येव यत्कर्म, नियतं क्रियतेऽर्जुन।
सङ्गं त्यक्त्वा फलं चैव, स त्यागः सात्त्विको मतः॥

श्रीमद्भगवद्गीता- १८.९

भावार्थः- हे अर्जुन! 'केवल कर्तव्य मात्र करना है' ऐसा समझकर जो कर्म आसक्ति और फलेच्छाका त्याग करके किया जाता है, वही सात्त्विक त्याग माना गया है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## ११५ कलाकारेभ्यः सङ्गीत-नाटक-अकादम्याः पुरस्कार-प्रदानं करिष्यति राष्ट्रपतिः

नवदेहली, हिमसंस्कृतवार्ता । राष्ट्रपतिः द्रौपदी मुर्मु वर्ष २०२४ तथा २०२५ कृते ११५ कलाकारेभ्यः सङ्गीत-नाटक-अकादम्याः छात्रवृत्तीन् पुरस्कारांश्च प्रदास्यति। गुरुवासरे नवदेहल्याः विज्ञानभवनस्य आयोजिते अस्मिन् पुरस्कारसमारोहे संस्कृति-पर्यटनमन्त्री गजेन्द्रसिंहः शेखावतः, संस्कृति-राज्यमन्त्री रावइन्द्रजितसिंहश्च उपस्थिताः भविष्यन्ति। संस्कृतिमन्त्रालयेन उक्तं यत् देशस्य विभिन्नराज्यानां केन्द्रशासितप्रदेशानाञ्च चयनिताः एते छात्रवृत्ति-पुरस्कार-विजेतारः सम्पूर्णदेशस्य प्रतिनिधित्वं कुर्वन्ति।

### प्रधानमन्त्री नरेन्द्र मोदी देशवासिभ्यः स्वातन्त्र्यदिनोत्सवं गर्वस्य, सम्मानस्य, उत्साहाञ्च सह पालितुम् आह्वानं कृतवान्

नवदेहली,हिमसंस्कृतवार्ता। प्रधानमन्त्री नरेन्द्र मोदी देशवासिभ्यः स्वातन्त्र्यदिनोत्सवं गर्वस्य, सम्मानस्य, उत्साहाञ्च सह पालितुम् आह्वानं कृतवान्, विकसितभारतस्य निर्माणस्य सङ्कल्पं च कर्तुम् उक्तवान्। सामाजिकमाध्यमे एकं चलच्चित्रं साझां कुर्वन् श्रीमोदी नागरिकान् एकीभूय देशस्य स्वातन्त्र्यसेनानीभ्यः श्रद्धांजलिम् अर्पयितुम् आग्रहं कृतवान्। अस्मिन् अवसरे, प्रधानमन्त्री सर्वेभ्यः 'हर घर तिरंगा' अभियानान्तर्गतं स्वेषां गृहेषु तिरङ्गमार्दध्वजम् आरोहयितुम् अपि आह्वानं कृतवान्।

## प्रत्यक्षकरसङ्ग्रहणे २३ प्रतिशतस्य उल्लेखनीया वृद्धिः-आयकरविभागः




नवदेहली,हिमसंस्कृतवार्ता। आयकरविभागेनाद्यतनं यावत् (दशमे दिनाङ्के) वित्तवर्षस्य २०२६-२७ कृते ८ लक्ष ११ सहस्रकोटिरूप्यकेभ्यः अधिकस्य शुद्धप्रत्यक्षकरस्य सङ्कलनं कृतम्। इदं वित्तवर्षस्य २०२५-२६ तमे समये समकालीनापेक्षया २३.०९ प्रतिशतम् अधिकवृद्धिमत् अस्ति। अस्मिन् सङ्ग्रहणे २ लक्ष ७० सहस्रकोटिरूप्यकाणां निगमकः करः तथा ५ लक्ष ७ सहस्रकोटिरूप्यकाणां गैर-निगमकः करः सम्मिलितः अस्ति। विभागेनापि १ लक्ष ४३ सहस्रकोटिरूप्यकेभ्यः अधिका धनप्रत्यार्पणं कृतम्। सकलप्रत्यक्षकरसङ्ग्रहे १९ प्रतिशततः अधिका उल्लेखनीयवृद्धिः दर्शिता, या ९ लक्ष ५४ सहस्रकोटिरूप्यकेभ्यः अधिका वर्तते।

## आर.बी.आई. द्वारा बैङ्किंगक्षेत्रे 'AI' इत्यस्य उपयोगाय आह्वानम्

मुम्बई, हिमसंस्कृतवार्ता। भारतीय-रिज़र्व-बैङ्कस्य राज्यपालः भारतीयबैङ्केभ्यो नवाचारस्य, उत्तरदायित्वस्य, ग्राहकविश्वासस्य च स्पष्टं ध्यानं दातुं कृत्वा कृत्रिमबुद्धेः (AI) स्वीकरणस्य आह्वानं कृतवान्। मुम्बई-नगरे आयोजिते 'एफ.आई.बी.ए.सी. २०२६' (FIBAC 2026) सम्मेलने सम्बोधयन् आरबीआई-राज्यपालः अवदत् यत् कृत्रिमबुद्धिः ऋणवितरणे, ग्राहकसेवायाम्, वित्तीयसमावेशने, परिचालनदक्षतायाम्, भ्रष्टाचारस्य अन्वेषणे च परिष्कारं कृत्वा भारतीयबैङ्किंगक्षेत्रे क्रान्तिं जनयितुं शक्नोति। अपि च, राज्यपालः बैङ्कान् अपारदर्शिनां 'ब्लैक बॉक्स' प्रतिरूपकानां, एल्गोरिदम-पूर्वाग्रहाणां, प्रौद्योगिकीप्रदातॄणां केन्द्रीयकरणस्य, दत्तांशगोपनीयतायाः, साइबर-दुर्बलतानाम्, एआई-आधारितनिर्णयानाम् उपरि अत्यधिकनिर्भरतायाः च जोखिमविषये सावधानान् करोत्।

## भारतस्य अर्थव्यवस्था सुदृढा अस्ति : फिच रेटिंग्स




नवदेहली,हिमसंस्कृतवार्ता। वैश्विक-रेटिंग-एजन्सी 'फिच-रेटिंग्स' इत्यनेन भारतस्य सॉवरेन-रेटिंग 'ट्रिपल-बी-माइनस' इत्येतत् यथावत् स्थापिता। एजन्सी अवदत् यत् इदं भारतस्य प्रबलविकाससम्भावनानाम् सशक्तबाह्यवित्तीयबुनियादीस्थितिं च दर्शयति। फिच द्वारा भारतस्य कृते स्थिरदृष्टिकोणमपि धारितं तथा उक्तं यत् पश्चिम-एशिया-सङ्कटात् उत्पन्नानाम् ऊर्जा-सङ्कट-आह्वानानाम् अनन्तरमपि भारतस्य गृह-अर्थव्यवस्था सुदृढस्थितौ वर्तते। एजन्सी अनुमितवती यत् अग्रे मार्चमासे समाप्यमाने वित्तवर्षे जीडीपी-वृद्धिः ६.४ प्रतिशतं भविष्यति।

## विदेशमन्त्रिणा कोलम्बिया-भूकम्पे भारतपक्षतः दुःखप्रकटनं कृतम्



नवदेहली,हिमसंस्कृतवार्ता।विदेशमन्त्री डा. एस. जयशंकरः कोलम्बिया-देशे भूकम्पेन जातायाः जनधनहान्याः विषये गाढं दुःखं प्रकटितवान्। स्वसन्देशे सः मृतानां कुटुंबानाम् कृते संवेदनाः प्रकटितवान्। सः आघातानां शीघ्रं स्वास्थ्यलाभस्य कामनां कृतवान्। डा. जयशंकरः अवदत् यत् भारतं सर्वेषां सम्भवसहयोगप्रदानाय तत्परमस्ति।

## केन्द्रीय-स्वास्थ्यमन्त्री जगतप्रकाश नड्डा अवदत् टीबी-उन्मूलनाय सर्वकारस्य महत्तमाः उपायाः



नवदेहली ,हिमसंस्कृतवार्ता। केन्द्रीय-स्वास्थ्यमन्त्री जगतप्रकाश नड्डा अवदत् यत् सर्वकारेण देशे टीबी (क्षयरोगः) इत्यस्य निर्मूलनाय तथा अस्य प्रसारस्य न्यूनीकरणाय अनेके प्रमुखाः उपायाः कृताः सन्ति। केरलं तथा कर्नाटकस्य सांसदाभिः सह नवदेहल्यां 'टीबी-मुक्त-भारत-अभियानम्' विषये चर्चाम् कुर्वन् श्रीनड्डा अवदत् यत् अस्य अभियानस्य सफलतायै सांसदाः, विधानसभासदस्याः, अन्ये जनप्रतिनिधयश्च जागरूकतया कार्यं कुर्युः। श्रीनड्डा सूचयितवान् यत् देशे २०१५ तमे वर्षात् २०२४ तमे वर्षे यावत् टीबी-प्रकरणानाम् २१ प्रतिशतस्य ह्रासः दर्जः जातः, यः वैश्विकस्तरात् लगभगद्विगुणः अस्ति।

## खरीफ-सस्यानाम् ९६७ लक्षहेक्टेयरतः अधिके क्षेत्रे वपनम्



नवदेहली,हिमसंस्कृतवार्ता। कृषि-किसान-कल्याण-मन्त्रालयेन सूचतं यत् अस्मिन् मासे ७ दिनाङ्कं यावत् खरीफ-सस्यानाम् अन्तर्गतं कृष्टस्य क्षेत्रस्य क्षेत्रफलम् ९६७ लक्षहेक्टेयरतः अधिकं जातम् अस्ति। मन्त्रालयेन उक्तं यत् ३४४ लक्षहेक्टेयरतः अधिकक्षेत्रे धानस्य कृषिः कृता अस्ति, यदा तु १८० लक्षहेक्टेयरतः अधिकक्षेत्रे तिलहनस्य वपनं कृतम्, यत् गतवर्षस्य अस्याः अवधेः अपेक्षया ५ लक्षहेक्टेयरतः अधिका वृद्धिः अस्ति। मन्त्रालयानुसारं १६८ लक्षहेक्टेयरतः अधिकक्षेत्रे अन्नस्य, १०६ लक्षहेक्टेयरतः अधिकक्षेत्रे कपासस्य, ५८ लक्षहेक्टेयरतः अधिकक्षेत्रे च इक्षुसस्यस्य कृषिः कृता।

### क्रीडावार्ता



## राष्ट्रमण्डल-खड्गचालनं प्रतियोगितायां भारतेन १७ पदकानि जितानि

लागोस, नाइजीरिया | हिमसंस्कृतवार्ता। नाइजीरिया-देशस्य लागोस-नगरे राष्ट्रमण्डल-अण्डर-२३ खड्गचालनं-चैम्पियनशिप-प्रतियोगितायाः प्रथमे दिने भारतेन चत्वारः स्वर्णपदकाः, चत्वारः रजतपदकाः, नव कांस्यपदकाः च सह आहत्य १७ पदकानि जितानि। रविवासरे आरब्धा प्रतियोगिता १४ आगस्ट्-दिनाङ्कं यावत् प्रचलति। पुरुषाणां सेबर-स्पर्धायां निखिल-वाघः स्वर्णं, लक्ष्य-बडसेरः रजतं च प्राप्तवन्तौ। महिलावर्गे जॉयस-अशिता फोइल-स्पर्धायां तथा प्राची-लोहानेन एपी-स्पर्धायां स्वर्णपदकं प्राप्तम्।

## सर्वकारेण उक्तं यत् 'एल-नीनो' प्रभावस्य सम्भाव्य-दुष्परिणामानाम् निरन्तरं निरीक्षणं क्रियते

सर्वकारेण उक्तं यत् भारतीय-ऋतु-विज्ञानेन सह घनिष्ठ-समन्वयेन प्रवर्धमानायाः प्रावृट्-स्थितेः तथा कृषौ 'एल-नीनो' प्रभावस्य सम्भाव्य-दुष्परिणामानाम् निरन्तरं निरीक्षणं क्रियते। कृषक-तथा-कृषि-कल्याण-राज्यमन्त्री रामनाथ-ठाकुरः अद्य लोकसभायां कस्यचित् प्रश्नस्य लिखित-उत्तरे एताम् सूचनां प्रादात्। तेन संसूचितं यत् येषु द्विचत्वारिंशतोत्तरत्रिंशत् जनपदेषु सामान्यतः अल्प-वृष्टिः सम्भाव्यते, तेषां राज्यानां कृते 'जनपद-कृषि-आकस्मिक-योजनाः' अद्यतनीकृताः सन्ति। मन्त्रिणा प्राबोधि यत् विभिन्न राज्येभ्यः द्विसप्तत्यधिकैकशतलक्षाधिक-क्विण्टल्-मित-बीजानां याचनायाः प्रत्युत्तरे पर्याप्त-मात्रायां बीजानां सम्पूर्तिः सुनिश्चिता विहिता। श्रीठाकुरेण ज्ञापितं यत् केन्द्रीय जल आयोगः राज्य-प्रशासनानि च जलाशयानां सर्वोत्तमाय उपयोगाय तथैव दक्ष-सेचन-विधीनाम् उत्कर्षाय पूर्व-योजनाः रचयितुम् उपदिष्टाः।

## पाक-अधिकृत-जम्मू-काश्मीरे अगस्त मासस्य त्रयोदश दिनाङ्कतः वैश्विकाः प्रतिरोधाः भविष्यन्ति

पाक-अधिकृत-जम्मू-काश्मीरे पाकिस्थानी-अत्याचारस्य विरोधे अगस्त मासस्य त्रयोदश दिनाङ्कतः वैश्विकाः प्रतिरोधाः भविष्यन्ति। 'अवामी एक्शन् कमिटी' सङ्गठनेन अगस्तमासस्य चतुर्दशदिनाङ्कः 'कृष्ण-दिवसत्वेन उद्घोषितः। षष्ट्यधिक-जनानां हत्यां तथा पंचशतोप्यधिक जनानाम् आघातम् अधिकृत्य पाकिस्थानी दूतावासानां पुरतः प्रदर्शनस्य योजना अस्ति

# सुन्दरसिंहठाकुरः मन्त्री भविष्यति! प्रियंका गान्धी शिमलाम् आगन्तुं शक्नोति, फलोत्पादकेभ्यः प्राप्तम् इदम् आश्वासनम्



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे दीर्घकालात् प्रचलन्त्याः मन्त्रिमण्डलविस्तारस्य चर्चायाः मध्ये मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः महान्तं सङ्केतं दत्तवान्। मुख्यमन्त्री अवदत् यत् सुन्दरसिंहठाकुरः शीघ्रमेव मन्त्रिमण्डलमन्त्री रूपेण शपथं ग्रहीष्यति। एतेन सहैव प्रदेशे मन्त्रिमण्डलविस्तारः विभागानाम् परिवर्तनं च शीघ्रमेव भविष्यति इति उक्तम्।

शिमलायाः चौड़ा मैदान इत्याख्ये स्थाने मुख्यमन्त्री अवदत् यत् राजनीतिककार्यसमित्याः उपवेशनानन्तरं मन्त्रिमण्डलविस्तारं सम्बन्ध्य अग्रे निर्णयः भविष्यति। तथापि सुन्दरसिंहठाकुरस्य मन्त्रीभवनाय अनुमतौ प्राप्तायां तस्य शपथग्रहणं राजनीतिककार्यसमित्याः उपवेशनात् पूर्वम् अपि भवितुं शक्नोति। अधुना समितेः उपवेशनस्य तिथिः न निश्चिता। मुख्यमन्त्री कतिपयदिनेभ्यः पूर्वम् अपि मञ्चात् सुन्दरसिंहठाकुरस्य मन्त्रीभवनस्य घोषणां कृतवान् आसीत्। अस्मिन् स्थितौ अधुना तस्य मन्त्रिमण्डले समावेशस्य चर्चाः अधिकाः प्रबलाः जाताः। प्रायः सार्धत्रिभ्यः वर्षेभ्यः एकं मन्त्रिपदं शून्यम् अस्ति। हिमाचलप्रदेशे मुख्यमन्त्रिणा सह मन्त्रिमण्डले आहत्य १२ पदानि भवितुं शक्नुवन्ति। सुक्खू- सर्वकारस्य गठनसमये प्रारम्भतः अष्टभ्यः मन्त्रिभ्यः उत्तरदायित्वं दत्तम् आसीत्। पश्चात् राजेशधर्माणी, यादवेन्द्रगोमा च मन्त्रिमण्डले समाविष्टौ। एतदपि अतीत्य एकं मन्त्रिपदं दीर्घकालात् शून्यम् अस्ति। प्रायः सार्धत्रिभ्यः वर्षेभ्यः रिक्तं चलन् इदं पदं पूरयितुं निरन्तरं राजनैतिकी चर्चा भवति स्म। मुख्यमन्त्रिणः नूतननिवेदनात् परम् अधुना सुन्दरसिंहठाकुराय इदम् उत्तरदायित्वं प्राप्तुं सम्भावना दृढा जाता।

## पूर्वं मुख्यसंसदीयसचिवः आसीत् सुन्दरसिंहः-

सुन्दरसिंहठाकुरः सुक्खु-सर्वकारे मुख्यसंसदीयसचिवः आसीत्। तथापि न्यायेन मुख्यसंसदीयसचिवानां नियुक्तिम् असंवैधानिकीं घोषयित्वा सः अस्मात् पदात् निष्कासितः। सुन्दरसिंहठाकुरस्य जन्म ५ मई १९६५ दिनाङ्के कुल्लू-मण्डलस्य शलांगग्रामे अभवत्। सः पञ्जाब- विश्वविद्यालयतः बी.एससी. उपाधिं प्राप्तवान्, पश्चात् हिमाचलप्रदेश- विश्वविद्यालयतः विधि-अध्ययनं कृतवान्। सः फलोत्पादनेन उपाहारगृह-(होटल) व्यवसायेन च सम्बद्धः अस्ति। १९९१ तमे वर्षे सः प्रथमवारं पञ्चायतसमित्याः निर्वाचनं जितवान्, पश्चात् कुल्लू-पञ्चायतसमित्याः अध्यक्षः अभवत्।

## प्रियंका गान्ध्याः १४ आगस्त दिनाङ्के शिमलाम् आगमनाय सम्भावना

मुख्यमन्त्री प्रियंका गान्ध्याः १४ आगस्त दिनाङ्के शिमलाम् आगमनाय सम्भावनाम् प्रकटितवान्। सः अवदत् यत् मण्डी-मण्डलस्य द्वारी-ग्रामे आपदा क्षतिग्रस्तः विद्यालयः प्रियंका गान्ध्याः निर्देशानन्तरं निर्मितः अस्ति। वर्षाका लानन्तरम् अस्मिन् विद्यालये पुनरुच्चशिक्षणं प्रारम्भं भविष्यति इति उक्तम्। मुख्यमन्त्री अवदत् यत् हिमाचलप्रदेशेन सह प्रियंका गान्ध्याः विशेषः स्नेहः अस्ति। आपदायाः समये सा मण्ड्याः प्रभावितक्षेत्राणां भ्रमणं कृतवती आसीत्। अस्मिन् एव अन्तरे सा क्षतिग्रस्तं विद्यालयं दृष्टवती, छात्राणाम् अध्ययनं न बाधितं भवेत् इति बलं दत्तवती आसीत्। प्रियंका गान्ध्याः सम्भावितभ्रमणस्य समये अस्य विद्यालयस्य उद्घाटनस्य सम्भावना अपि व्यक्ता क्रियते।

## सेब-फलोत्पादकानां कृते अपि सर्वकारस्य महत् आश्वासनम्

मुख्यमन्त्री सेब-फलोत्पादकान् प्रति अपि सर्वकारस्य पक्षं स्पष्टम् अकरोत्। सः अवदत् यत् फलोत्पादकानाम् १०० न, अपितु २००, ३००, ४०० वा यावन्तः अपि सेब-स्यूताः (बोरा) भविष्यन्ति, सर्वे क्रेष्यन्ते। फलोत्पादकाः एम. आई. एस. (MIS) पटल-सूच्याम् आवश्यकानि पत्राणि उपारोपयितुं कथिताः। सः ज्ञापितवान् यत् गते सेब-ऋतौ सम्बद्धेभ्यः यैः फलोत्पादकैः उपमण्डलाधिकारिणः माध्यमेन सूचनापत्राणि प्राप्तानि, तानि तत्कालेन स्थगयितुम् अधिकारिणः निर्दिष्टाः। मुख्यमन्त्री अवदत् यत् कस्यापि फलोत्पादकस्य उपरि बलात् कोऽपि नियमः न प्रारोपयिष्यते। सर्वकारः अवदत् यत् फलोत्पादकानाम् आर्थिकसमृद्धये कांग्रेस- सर्वकारः पूर्णतः प्रतिबद्धः अस्ति, तेषाम् क्लेशस्य किमपि औचित्यं नास्ति।

### कैबिनेट-विस्तारेण सह विभागानां परिवर्तने अपि दृष्टिः

मुख्यमन्त्रिणः कथनानन्तरम् अधुना मन्त्रिमण्डलविस्तारेण सह विभागानां सम्भावितपरिवर्तनस्य विषये अपि चर्चाः तीव्राः जाताः। राजनीतिककार्यसमित्याः उपवेशनस्य तिथिः निश्चिता भूत्वा उच्चकमानस्य अनुमोदनात् परम् चित्रं पूर्णतः स्पष्टं भविष्यति इति आशा अस्ति। संसदः मानसूनसत्रकारणात् दलस्य उच्चकमानस्य व्यस्तत्वात् राजनीतिक- कार्यसमित्याः उपवेशनम् पूर्वम् अपि स्थगितम् अभवत्।



# १५०० कोटि-रूप्यकाणां विषये प्रधानमन्त्रिणा मोदीवर्येण सह चर्चां कुर्वन्तु भाजपा- विधायकाः- सुक्खु

हिमसंस्कृतवार्ताः- शिमला। अग्नि-शमन-विभागस्य समारोहे मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः अवदत् यत् विभागः नूतनप्रौद्योगिक्या सुदृढः क्रियमाणः अस्ति। सर्वकारस्य उद्देश्यम् अस्ति यत् अग्निदाहात् जायमाना क्षतिः न्यूनीकर्तुं शक्येत्। अस्मिन् अन्तरे पत्रकारैः प्रधानमन्त्रिणा नरेन्द्रमोदीवर्येण घोषितानां १५०० कोटि-रूप्यकाणाम् उपरि प्रश्नः पृष्टः, तदा मुख्यमन्त्रिणा उक्तं यत् अधुना यावत् एतत् धनम् न प्राप्तम्। अहम् भाजपा-विधायकेभ्यः वक्तुम् इच्छामि यत् ते मानसूनसत्रात् पूर्वम् प्रधानमन्त्रिणा नरेन्द्रमोदीवर्येण सह अस्मिन् सन्दर्भे चर्चां कुर्वन्तु, आपदा-आश्रय-कोषात् च घोषितानां १५०० कोटि-रूप्यकाणां प्रथमांशराशिं हिमाचलप्रदेशाय दापयन्तु। मुख्यमन्त्रिणा उक्तं यत् सः स्वयं अपि अस्मिन् सन्दर्भे प्रधानमन्त्रिणा सह चर्चां करिष्यति। उद्यानपालकानां विषयाणाम् उपरि पृष्टप्रश्नस्य उत्तरं यच्छन् मुख्यमन्त्रिणा प्रोक्तं यत् उद्यानपालकेभ्यः दत्ताः सूचनापत्राणि प्रतिनिवर्तिष्यन्ते, अस्य कृते सम्बद्धाः अधिकारिणः निर्देक्ष्यन्ते यत् उद्यानपालकाः न प्रपीडनीयाः। मुख्यमन्त्रिणा स्पष्टीकृतं यत् उद्यानपालकानाम् यत्किञ्चित् 'कल्ड-सेब' अस्ति, तत् १०० स्यूताः वा ५०० स्यूताः वा भवेयुः, सर्वकारः तत् सर्वं ग्रहीष्यति। शुल्कवर्धने मुख्यमन्त्रिणा उक्तं यत् संस्थानां श्रेष्ठतायै समये समये न्यूना शुल्कवर्धना आवश्यकी भवति, परन्तु यदि एषा वर्धना अधिका अस्ति, तर्हि अस्मिन् विषये उप-कुलपतिना सह अहम् स्वयं चर्चां करिष्यामि।

# जिला-परिषद्-निर्वाचने किम् अवदत् मुख्यमन्त्री

जिला-परिषद् अध्यक्ष-पदस्य निर्वाचनमधिकृत्य भारतीय-जनता-पार्टी न्यायालयं गता श्रवणस्य तिथिः १७ निर्धारिता अस्ति। अस्मिन् मुख्यमन्त्रिणा उक्तं यत् अस्मिन् सन्दर्भे ये अपि उच्च- न्यायालयस्य दिशानिर्देशाः भविष्यन्ति, तेषाम् पालनं करिष्यते। तेन एतदपि उक्तं यत् जिला- परिषद्, 'बीडीसी' इत्यस्य च निर्वाचनानि स्थानीयस्तरे भवन्ति। एतानि राजनैतिक-दलस्य आधारेण न भवन्ति, परन्तु भाजपादलेन अत्रापि स्वकीयाः अभ्यर्थिनः घोषिताः। विधायक-निर्वाचने जनसमूहः अपरं किमपि विचार्य मतदानं करोति, लोकसभा-निर्वाचने अपरं किमपि दृष्ट्वा मतदानं क्रियते, मण्डल-परिषद्, 'बीडीसी', पञ्चायत- निर्वाचनेषु च जनसमूहः स्थानीयविषयान् आधारीकृत्य मतदानं करोति। अतः एतानि निर्वाचनानि दलाधारितानि न भवन्ति।

# अरुणाचलप्रदेशः भारतस्य अविभाज्यम् अभिन्नम् च अङ्गम् अस्ति-विदेश-मन्त्रालयस्य प्रवक्ता रणधीर-जयसवालः

विदेश-मन्त्रालयस्य प्रवक्ता रणधीर-जयसवालः नवदिल्ल्याम् अवदत् यत् अरुणाचलप्रदेशः भारतस्य अविभाज्यम् अभिन्नम् च अङ्गम् अस्ति, एतत् शाश्वत-सत्यम् केनापि परिवर्तयितुम् न शक्यते। तेनोक्तं यत् चीन-देशेन सह सीमा-विवादेषु भारतम् अहोरात्रम् एतान् विषयान् अतिगम्भीरतया पश्यति, तत्र च शान्तेः स्थिरतायाः च स्थापनं राष्ट्रस्य प्राथमिकम् उद्देश्यम् अस्ति।



अत्रावसरे जयसवाल असूचयत् यत् भारतेन द्विपक्षीय वार्तायै तथा च दिल्ल्याम् आयोज्यमानस्य ब्रिक्स्-आउटरीच्-सत्रस्य कृते बाङ्ग्लादेशस्य प्रधानमन्त्रिणे तारिक-रहमान-महोदयाय औपचारिकं निमन्त्रणम् प्रेषितम्। परह्यः बाङ्ग्लादेशे भारतीय-उच्चायुक्तः तेन सह शिष्टाचार-मेलनम् अकरोत्, यत्र उभयोः देशयोः परस्पर-हित-विषयेषु विमर्शो जातः।

# हिमाचलप्रदेशाय प्राप्ताः ४६ नूतनाः अग्निमन- वाहनाः, मुख्यमन्त्री सुक्खु दर्शितवान् हरित- पताकाम्; ३७ अपि नूतनानाम् क्रयणाय सज्जीभावः

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे अग्निदाहात् अन्य-आपातस्थितिभ्यः च रक्षणाय अग्निशमनसेवाः सुदृढाः क्रियमाणाः सन्ति। मुख्यमन्त्री ठाकुर-सुखविन्दरसिंहसुक्खुः बुधवासरे प्रदेशस्य विविध-मण्डलानाम् अग्निशमन- एककेभ्यः ४६ नूतनान् शीघ्रप्रतिक्रिया- वाहनान् हरितपताकां दर्शयित्वा प्रेषितवान्। एतैः वाहनैः अग्निदाहस्य आपदायाः च घटनावसरे शीघ्रं स्थानं प्राप्य राहत- रक्षण- कार्याणि प्रारब्धुं साहाय्यं प्राप्स्यते। मुख्यमन्त्री अवदत् यत् प्रदेशसर्वकारः सामान्यजनानां सुरक्षां सर्वोच्चप्राथमिकतां ददाति। कस्यामपि आपदायाम् आपातस्थितौ वा शीघ्रप्रतिक्रियायै अग्निशमन- आपातकालीन- सेवानां सुदृढीकरणम् आवश्यकम् अस्ति। सः ज्ञापितवान् यत् ३७ अन्य- नूतन- अग्निशमनवाहनानां क्रयणप्रक्रिया अपि प्रचलन्ती अस्ति।

### शिमला-मण्डलाय सर्वाधिकं नववाहनानि

नूतनेषु शीघ्रप्रतिक्रिया-वाहनेषु शिमला-मण्डलाय सर्वाधिकानि नव वाहनानि प्राप्तानि। काङ्गडामण्डले अष्ट, मण्डी-सोलन-मण्डलार्य पञ्च- पञ्च वाहनानि प्रेषितानि। हमीरपुर- ऊना- चम्बा- लाहौलस्पीति-मण्डलेभ्यः त्रीणि त्रीणि, सिरमौर- बिलासपुर-कुल्लू- मण्डलेभ्यः द्वे द्वे वाहने दत्ते। किन्नौर-मण्डलाय एकं वाहनं प्राप्तम् अस्ति।

### अग्निशमन-सेवाभ्यः ६५.३३ कोटिरूप्यकाणां व्ययपत्रकम्

मुख्यमन्त्री अवदत् यत् प्रदेशसर्वकारः अग्निशमन-सेवानां विस्ताराय आधुनिकीकरणाय च विशेषध्यानं ददाति। एतदर्थं ६५.३३ कोटिरूप्यकाणां व्ययपत्रकं स्वीकृतम् अस्ति। २०२४-२५ वर्षे अपि ९.६० कोटिरूप्यकाणि व्ययीकृत्य २२ अग्निशमनवाहनानि क्रीतानि आसन्, यानि सम्बद्ध-एककेभ्यः उपलब्धानि कारितानि। सः अवदत् यत् सर्वकारस्य प्रयासः अस्ति यत् प्रदेशस्य प्रतिक्षेत्रम् आधुनिक- अग्निशमन-आपातकालीनसेवाः उपलब्धाः भवेयुः। विभागः आधुनिकप्रविधिभिः, अत्याधुनिक-उपकरणैः, प्रशिक्षित-कर्मचारिभिः च सुसज्जितः क्रियते। आगामिसमये आवश्यकतानुसारम् अग्निशमनकेन्द्राणां, चौकीनां, वाहनानां, मानव-संसाधनानां च विस्तारः करिष्यते।

### बिझडीस्थाने चौकीभवनं निर्मितं, बहुषु स्थानेषु निर्माणं प्रचलति

मुख्यमन्त्री व्यक्तवान् यत् प्रायः ४.८५ कोटिरूप्यकाणां व्ययेन बिझडी- अग्निशमन- चौक्याः भवनं निर्मितम् अभवत्। नादौन- इंदौरा- स्थानयोः उप-अग्निशमनकेन्द्राणां भवनानां निर्माणे ३.५०-३.५० कोटिरूप्यकाणि व्ययीक्रियन्ते। कण्डाघाटस्थाने उप-अग्निशमनकेन्द्रस्य निर्माणाय त्रयः कोटिरूप्यकाणि स्वीकृतानि सन्ति। नूतनानाम् स्तरोन्नतानां च उप-अग्निशमन-केन्द्राणां चौकीनां च कृते ३.८५ कोटिरूप्यकाणां व्ययेन अष्ट जल-वाहनानि अपि क्रीयन्ते।

### टाहलीवाल-केन्द्रस्य स्तरोन्नयनं, चङ्गर-स्थाने नूतना चौकी

मुख्यमन्त्री अवदत् यत् अग्निशमन-सेवानाम् प्रसाराय नूतनाः एककाः अपि स्थाप्यन्ते। ऊना- मण्डलस्य टाहलीवालस्थानम् उप- अग्निशमन- केन्द्ररूपेण स्तरोन्नतम् कृतम्। अपरपक्षे काङ्गडा- मण्डलस्य चङ्गरक्षेत्रे नूतना अग्निशमनचौकी प्रारब्धा। सः ज्ञापितवान् यत् नूतन-अग्निशमन-एककानां सञ्चालनाय विविध-श्रेणीनां ७५४ स्वीकृतपदानि पूरितानि। सर्वकारस्य लक्ष्यम् आधुनिकवाहनैः, उत्तम-उपकरणैः, पर्याप्त- मानव- संसाधनेन, सुदृढ-आधारभूतसंरचनया च प्रदेशस्य आपातकालीन-प्रतिक्रियाक्षमतां सुदृढां कर्तुम् अस्ति, येन अग्निदाहे अन्य-आपदासु च जन- धनस्य हानिः न्यूना भवेत्। अस्मिन् अवसरे शिमलानगरनिगमस्य महापौरः सुरेन्द्र चौहानः, अतिरिक्त-मुख्यसचिवः आर.डी. नजीमः, डी.जी. होमगार्ड सतवन्त अटवालः, उपायुक्त-शिमला अनुपम कश्यपः, आरक्षी- अधीक्षकः गौरव सिंहः, अग्निशमनविभागस्य वरिष्ठाः अधिकारिणः च उपस्थिताः आसन्।

## Cyber Police Advisory- शुभकामनासु निगूढम् अस्ति 'साइबर'-जालम्, एकया सञ्चिकया (File) शून्यं भवितुं शक्यते भवतः वित्तकोषसंख्या



हिमसंस्कृतवार्ताः — शिमला। 'साइबर'-वञ्चकाः स्वतन्त्रता-दिवसस्य उत्सवं वञ्चनायाः नूतन-शस्त्रं रचयन्ति। १५ अगस्त-दिनाङ्कात् पूर्वं जनानां चलभाषेषु (Mobile) देशभक्त्या सम्बद्धाः सन्दिग्धाः 'लिङ्क्'-सङ्केताः 'एपीके'-सञ्चिकाः (APK Files) च प्रेष्यमाणाः सन्ति। एतासां सञ्चिकानाम् उद्घाटनेन 'एप'-अनुप्रयोगस्य 'डाउनलोड'-करणेन वा वैयक्तिकी 'बैङ्किङ्ग'-सूचना च सङ्कटे पतितुं शक्यते। 'साइबर'-आरक्षणा-विभागस्य अनुसारं वञ्चकाः तादृशानाम् अवसराणाम् उपयोगं जनानां विश्वासं जेतुं कुर्वन्ति। ते 'व्हाट्सएप', 'एसएमएस' सामाजिक-माध्यमानां च माध्यमेन एतान् सन्दिग्ध-सङ्केतान् 'एपीके'-सञ्चिकाः वा प्रेषयन्ति।

### आरक्षक-महानिदेशकः अशोकतिवारी-वर्यः एतत् अवदत्

उपयोक्तुः एतेषाम् 'इन्स्टॉल'-करणेन सह एव अपराधिनः चलभाषस्य संवेदनशील-गतिविधिषु प्रवेशं प्राप्नुवन्ति। अनेन ते वैयक्तिक-सूचनाम्, 'ओटीपी'-सङ्केतं 'बैङ्किङ्ग'-विवरणं च प्राप्य आर्थिक-क्षतिं कारयितुं शक्नुवन्ति। आरक्षक-महानिदेशकः अशोकतिवारी-वर्यः अज्ञाताः 'एपीके'-सञ्चिकाः 'इन्स्टॉल' न कर्तुम् सन्दिग्ध-जाल-सङ्केतेषु (Web Links) 'क्लिक'-करणेन वर्जयितुं च प्रार्थनाम् अकरोत्। कस्यापि सूचनायाः पुष्टिं सम्बद्धात् सर्वकारीय-विभागात् तस्य आधिकारिक-द्वारात् (Portal) एव कुर्वन्तु। वञ्चकाः बहुधा निःशुल्क-उपहाराणाम् पारितोषिकाणां वा लोभं दत्त्वा 'लिङ्क्'-सङ्केतेषु 'क्लिक' कारयन्ति। तादृशानाम् सन्देशानां स्थाने आधिकारिक-जालस्थले सूचनायाः परीक्षणं सुरक्षितम् अस्ति।

### *गोप्यां सूचनां प्रत्यक्षी न कुर्वन्तु*

आरक्षक-विभागेन स्पष्टीकृतं यत् 'बैङ्किङ्ग'-सम्बद्धां गोप्यां सूचनां कस्मैपि न यच्छन्तु। 'ओटीपी', 'यूपीआई-पिन', 'सीवीवी' तथा च 'नेट-बैङ्किङ्ग'-इत्यस्य 'लॉगइन'-विवरणं कस्मैपि न वदन्तु। कोषः (Bank) कापि वैधा संस्था वा तादृशीं गोप्यां सूचनां कदापि न याचते। यदि 'एपीके'-सञ्चिकायाः 'इन्स्टॉल'-करणात् परं चलभाषः असामान्यं व्यवहारं कुर्यात्, तर्हि एतत् न उपेक्षणीयम्।

### वञ्चने जाते सति शीघ्रं कुर्वन्तु अभियोगम्

प्रमादात् सन्दिग्धा 'एपीके'-सञ्चिका 'इन्स्टॉल' जाते सति शीघ्रमेव चलभाष-दत्तं (Mobile Data) 'वाई-फाई'-संयोजनं च पिदधातु (बंद करें)। सन्दिग्धम् 'एप'-अनुप्रयोगम् 'अनइन्स्टॉल' कुर्वन्तु वित्तकोष-संख्यायाः कूट-शब्दान् (Passwords) परिवर्तयन्तु। कोषं (Bank) झटिति सूचयन्तु, विशेषतः यदि अनधिकृत-व्यवहारः (Transaction) जातः भवेत्। 'साइबर'-वञ्चने जाते सति शीघ्रमेव राष्ट्रिय-'साइबर'-अपराध-सहायता-सङ्ख्याम् (Helpline) १९३० इति कृते शब्दं (Call) कुर्वन्तु। गृह-मन्त्रालयस्य cybercrime.gov.in इति 'पोर्टल'-माध्यमेन अपि 'ऑनलाइन'-अभियोगः पञ्जीकर्तुं शक्यते।



## लौकिकन्यायकोशः

# चन्दनन्यायः

शरीरस्य एकस्मिन् भागे चन्दनं स्थापितं चेदपि संपूर्णे शरीरे आह्लादो भवति तथा आत्मा हृदयाख्ये शरीरस्य एकस्मिन् भागे भवति चेदपि तस्य प्रभावः सर्वशरीरोपरि भवतीति न्यायस्य आशयः। यथा-

**शरीरैकदेशसंबद्धोऽपि सन्**
**सकलदेहव्याप्ततमाह्लादं करोति।**
**इत्येवमात्माऽपि देहैकदेशस्थः**
**सकलदेहव्यापिनीमुपलब्धिं करिष्यति।।**

(ब्रह्मसूत्रशाङ्करभाष्ये- २-३-२३,२४)

**डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**

## हास्यकणिका

-विदुषी

यदि कश्चित् तेलङ्गणराज्ये भवेत्, तर्हि तस्य माता तं "पिल्ल" अथवा तां "पिल्ली" इति सम्बोधयेत्। 😂 बालकं "पिल्ला", बालिकां "पिल्ली" च इति कथ्यन्ते। 😄 🤣 😂

## नासा-संस्थया चन्द्र-आधार-कार्यक्रमे इसरो संस्था सहभागी भवितुम् आमन्त्रिता

नासा-संस्थया चन्द्र-आधार-कार्यक्रमे इसरो संस्था सहभागी भवितुम् आमन्त्रिता। बेङ्गलूरु-नगरे भारत-अमरीका-अन्तरिक्ष-कार्यदलस्य नवम्यां गोष्ठ्याम् इसरो अध्यक्षः डॉ. वी. नारायणन् तथा अमरीकीय राजदूतः सर्गियो गोरः भागम् अगृह्णीताम्। अस्मिन् अवसरे निसार-अभियानस्य सफलतायाः अनन्तरम् आगामि-मानव-अन्तरिक्ष-प्रौद्योगिकीषु परस्पर-सहयोगस्य विस्तारः स्वीकृतः।

# हिमाचले वर्षायाः प्रकोपः- त्रयाणां कार- यानानाम् उपरि पतिताः पाषाणखण्डाः, एकस्य मृत्युः, चत्वारः जनाः आहताः






**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।** ऋतु-विभागस्य सचेतनायाः मध्ये हिमाचलप्रदेशस्य बहुषु भागेषु महत्याः वर्षायाः भूस्खलनस्य घटनाः सम्मुखाः आगताः। भौमवासरे सायं ६:०० वादनं यावत् राज्ये भूस्खलनेन द्वौ राष्ट्रियराजमार्गौ अतिरिच्य २०६ मार्गाः स्थगिताः अभवन्। एतदतिरिच्य ४५ विद्युत्-परिवर्तकाः ८२ जल- आपूर्ति- योजनाः अपि प्रभाविताः सन्ति। शिमलासहितम् अन्येषु भागेषु धारासारवृष्टिः पञ्जीकृता। महत्याः वर्षायाः कारणेन नेरवा- आरक्षणस्थानस्य आवासभवनं भूस्खलनस्य परिधौ पतितम्। पर्वतात् मलिनावशेषनिपातनेन स्थानप्रभारी रामलालशर्मामहोदयस्य आवासस्य महती क्षतिः संजाता। सुदैवात् दुर्घटनायाः समये आवासभवने कोऽपि आरक्षकः उपस्थितः नासीत्, येन महती दुर्घटना निवृत्ता।

## आनी-मध्ये पर्वतात् पतितस्य मलिनावशेषस्य पाषाण-खण्डानां च व्याप्तौ आगते द्वे कारयाने

तत्रैव आनीमध्ये गतायाः रात्रेः निरन्तरं जायमानायाः वर्षायाः मध्ये आनीक्षेत्रे पृथक्- पृथक् स्थानेषु द्वे कारयाने पर्वतात् पतितस्य मलिनावशेषस्य पाषाणखण्डानां च व्याप्तौ पतिते। एकस्मिन् घटनाक्रमे कार-यानारूढौ द्वौ जनौ आहतौ अभवताम्, यदा च द्वितीयायां घटनायां मार्गपार्श्वे स्थितस्य कर-स्वीकृत-कार-यानस्य उपरि बृहत्-पाषाणखण्डः पतितः। प्रथमा घटना निर्माणाधीन- शाकमण्ड्याः पार्श्वे किरण- विपणि- बराड़योः मध्ये अभवत्। मारुति- अल्टो- कारयानं सङ्ख्या HP-35-7897 राष्ट्रियराजमार्ग-३०५ इत्यस्मात् गच्छति स्म। अस्मिन् अन्तरे पर्वतात् अकस्मात् भूस्खलनम् अभवत् बृहत्-मलिनावशेषः कारयानस्य उपरि अपतत्। मलिनावशेषस्य व्याप्तौ आगमनेन कारयानम् अवसन्नम्। घटनायां चालकः पदमसिंहः (५३) निवासी दोघरी-ग्रामस्य, तहसील आनी, कुल्लू-मण्डलस्य, अब्दुलरहमानः (३२) निवासी दोगरी-मोड़, तहसील आनी, कुल्लू- मण्डलस्य च गम्भीररूपेण आहितौ अभवताम्। द्वितीया घटना आनीक्षेत्रस्य नूतन- बस-स्थानकस्य पार्श्वे अभवत्। अत्र पर्वतात् एकः अतिविशालः पाषाणखण्डः मार्गपार्श्वे स्थितेन 'टैक्सी' सङ्ख्याकेन कार-यानेन सह आक्रान्तः। पाषाण-निपातनेन कारयानस्य महती क्षतिः अभवत्। सुदैवात् घटनायाः समये कारयाने कोऽपि न आसीत्, येन महती दुर्घटना टलिता।

## भराड़ीघाटस्य दसेरन-मध्ये कष्टदात्री दुर्घटना

शिमला- बिलासपुर- राष्ट्रियराजमार्ग- २०५ इत्यस्मिन् भराड़ीघाटस्य दसेरन-मध्ये भौमवासरे कष्टदात्री दुर्घटना संजाता। पर्वतात् अकस्मात् एका बृहती शिला चलतः कारयानस्य उपरि अपतत्। घटनायां कारयाने उपविष्टः एकः जनः स्थले एव मृतः अभवत्, यदा च द्वौ अन्यौ गम्भीररूपेण आहितौ संजातौ। शिला-निपातनेन कारयानं भृशं क्षतिग्रस्तम् अभवत् तस्मिन् उपविष्टाः जनाः महता प्रयासेन बहिः निष्कासितुं शक्याः। दुर्घटनायाः सूचनां प्राप्य एव स्थानीय-जनाः स्थलम् प्राप्य साहाय्य-रक्षण-कार्येषु संलग्नाः अभवन्। प्रायः एकं होरां यावत् रक्षण-कार्ये चले सति राष्ट्रियराजमार्गे वाहनानाम् आवागमनम् अपि प्रभावितम् अभवत्।

## मानसून-ऋतौ अधुना यावत् १६३ जनानां प्राणाः गताः

मानसून-ऋतौ ३० जूनतः ११ अगस्तदिनाङ्कं यावत् प्रदेशे विविधासु आपत्सु १६३ जनैः स्वकीयाः प्राणाः त्यक्ताः। २५७ जनाः आहिताः अभवन्। एतेषु ९३ जनानां मार्ग-दुर्घटनासु मृत्युः अभवत्। २३ पक्व-गृहाणि ४४ अपक्व-गृहाणि च पूर्णतः क्षतिग्रस्तानि अभवन्। २६८ अपक्क- पक्व- गृहाणि आंशिकरूपेण क्षतिं प्राप्तानि। १४ आपणानि २२६ गोशालाः च अपि क्षतिग्रस्ताः संजाताः। एतदतिरिच्य २०४ गृहपशूनाम् अपि प्राणाः गताः।

## राज्ये एतावन्ति दिनानि वर्षन्ति मेघाः

ऋतु-विज्ञान-केन्द्रं शिमला इत्यस्य अनुसारं ११, १२, १४, १५, १६ तथा च १७ अगस्त-दिनाङ्के राज्यस्य बहुषु स्थानेषु लघ्व्याः मध्यममात्रायाः च वर्षायाः सम्भावना अस्ति। ११ तथा १४ अगस्तदिनाङ्के केषुचित् स्थानेषु महत्याः अति-महत्याः च वर्षायाः नारङ्ग-सचेतना अस्ति। १२, १५, १६ तथा १७ अगस्त-दिनाङ्के केषुचित् स्थानेषु महत्याः वर्षायाः पीतसचेतना अस्ति। सप्ताहस्य अवशिष्टेषु दिनेषु बहुषु स्थानेषु लघ्व्याः मध्यममात्रायाः च वर्षायाः सम्भावनाः सन्ति। अद्य चम्बा, काङ्गड़ा, सिरमौर-मण्डलेभ्यः, यदा च १४ अगस्त-दिनाङ्के सिरमौरमण्डलाय नारङ्ग-सचेतना अस्ति।






## उच्चेयां पहाड़ां रा रीणा..

बड़ा ई मुश्किल अपणा लोको,उच्चेयां पहाड़ां रा रीणा ओ।
शागा कन्ने खाणी कुकड़ी री रोटी,ठंडा पाणी पीणा ओ।।

बिजली ता इत्ते नेईं पुजणी,तेल नी मिलणा गैस नी मिलणी।
जंगणी री लोई मट्टे मट्टे , जिंदडू रा खिंदडू सीणा ओ।।
शागा कन्ने खाणी कुकड़ी री रोटी,ठंडा पाणी पीणा ओ।।

मट्टी मजूरी इत्थे नी मिलणी,मैंगेयां लालेयां चमड़ी छिलणी।
दाल़ चौल़ नी मिलणे लोको,जखणे अंबर शीणा ओ।
शागा कन्ने खाणी कुकड़ी री रोटी,ठंडा पाणी पीणा ओ।।

सड़कां नी बणनी मोटरां नी चलणी,पैदल रीणा टंगोई।
औक्खे सौक्खे जिंदडु हंडाणा, टैमा जो ढक्का दीणा ओ।
शागा कन्ने खाणी कुकड़ी री रोटी,ठंडा पाणी पीणा ओ।।

गरीबी नी मुकणी चिंदनी मुकणी,सोच्ची सोच्ची जानई सुकणी
दसां नैंह कन्ने टब्बर हंडाणा कुसी बी किच्छ नी दीणा ओ।
शागा कन्ने खाणी कुकड़ी री रोटी,ठंडा पाणी पीणा ओ।।
(24-3-1994) तत्कालीन स्थितियों को व्यक्त करती रचना

**अशोक दर्द डलहौजी चंबा हिमाचल प्रदेश**



# बैजनाथ मन्दर

## (कांगड़ा, हिमाचल प्रदेश)

बैजनाथ मन्दर, जियो बैजनाथ शिव मन्दर या वैद्यनाथ मन्दर बी बोलदे न, भगवान शिव जो वैद्यनाथ ("वैद्यां रा स्वामी / डाक्टरों के भगवान") रे रूप च समर्पित इक बड़ा पुराणा हिंदू मन्दर है। एह हिमाचल प्रदेश रे कांगड़ा जिले दे बैजनाथ नामे रे छोटे जेहे कस्बे च स्थित है, जो धौलाधार धार दी पैह्ड़ी च बिंवा खड्ड (ब्यास नदी री सहायक खड्ड) रे कण्डे बस्या है। पैह्ले इस कस्बे रा नाम 'कीरग्राम' हुन्दा था, जो हुण भगवान रे नाम पर 'बैजनाथ' होई गेया है।

## इतिहास तें कथा

एह मन्दर १२०४ ई. च दो स्थानीय महाजनां अहुक ते मन्युक द्वारे बणाया था (मन्दर री कण्ढां पर लिखे दे पत्थरां रे शिलालेखां ते इसरी पुष्टि हुन्दी है)। इस ते पैह्ले बी एथू इक पुराणा शिव मन्दर था, जिहदी जगा पर एह नवाँ मन्दर बनाया गेया। एह मध्यकालीन उत्तर भारतीय नागर शैली री वास्तुकला रा बड़ा खरा नमुना है, जिंस च बाह्ली कण्ढां पर बक्ख-बक्ख हिंदू देवी-देवतां ते पौराणिक दृश्यां री पत्थरां पर बारीक नक्काशी किती दी है।

# भव्यसांस्कृतिकप्रस्तुतिभिः मिथिलामहिला-समित्या सावणमहोत्सवः समायोजितः



## मिथिलायां सावणमासस्य विशेषं महत्त्वम् अस्ति – डॉ. प्रतिमा झा

### पूनम झा 'सिया सुन्दरी' निर्वाचिता

**हिमसंस्कृतवार्ता -सौरभः दे**

बोकारो। प्रतिष्ठितायाः सामाजिक-सांस्कृतिकसंस्थायाः मिथिला सांस्कृतिक परिषद्, बोकारो इत्यस्याः इकाई मिथिला महिला समित्या सेक्टर-४-स्थिते मिथिला एकेडमी पब्लिक स्कूलस्य विद्यापति-सभागारे सावणमहोत्सवः भव्यसांस्कृतिककार्यक्रमैः सह हर्षोल्लासपूर्वकं समायोजितः। कार्यक्रमस्य उद्घाटनं मुख्यातिथिरूपेण उपस्थितया बोकारोनगरस्य उपायुक्तस्य अजय नाथ झा-महोदयस्य धर्मपत्नी डॉ. प्रतिमा झा, मिथिला महिला समित्याः अध्यक्षा पूनम मिश्रा तथा सचिवा आभा झा इत्येताभिः संयुक्तरूपेण दीपप्रज्वलनेन कृतम्। मुख्यातिथिः डॉ. प्रतिमा झा सर्वेभ्यः सावणमहोत्सवस्य शुभकामनाः प्रदाय अवदत् यत् भारतीयसंस्कृतौ सावणमासस्य धार्मिक-सांस्कृतिकदृष्ट्या महत्त्वं वर्तते एव, किन्तु मिथिलाञ्चले सावणमासस्य विशेषं महत्त्वम् अस्ति। भगवान् शिवस्य आराधनया, प्रकृतेः उत्सवेन च सह नवविवाहिताः महिलाः श्रद्धया हर्षोल्लासेन च मधुश्रावणीपर्वम् आचरन्ति। डॉ. प्रतिमा झा अवदत् यत् मिथिला महिला समित्या आयोजिते अस्मिन् कार्यक्रमे समागत्य सा अत्यन्तं प्रसन्नताम् अनुभवति। मिथिलायाः सांस्कृतिकपरम्परायाः संरक्षणे तस्याः समित्याः योगदानं प्रशंसनीयम् अस्ति। अस्मिन् अवसरे समित्याः अध्यक्षा पूनम मिश्रा तथा सचिवा आभा झा मुख्यातिथिं सम्मानितवत्यौ।

अवसरेऽस्मिन् संगीत-नृत्यप्रस्तुतिभिः सह विविधाः प्रतियोगिताः अपि आयोजिताः, यासु समित्याः सदस्याभिः उत्साहपूर्वकं सहभागिता कृता। कार्यक्रमस्य शुभारम्भः महाकविना विद्यापतिना विरचितायाः 'जय जय भैरवि असुर भयाउनि' इति भगवतीवन्दनायाः सुमधुरगायनेन अभवत्। ततः समित्याः सदस्याभिः सावणमासमाधारितानां मैथिलीगीतानां नृत्यप्रस्तुतीनां च मनोहारिण्यः प्रस्तुतयः प्रदर्शिताः, येन उपस्थिताः सर्वे आनन्दिताः अभवन्। सावणमिलनकार्यक्रमस्य अन्तर्गतायां 'सिया सुन्दरी' प्रतियोगितायां पूनम झा (शैव्या) प्रथमस्थानं, बीना झा द्वितीयस्थानं तथा विनीता राय तृतीयस्थानं प्राप्तवत्यः। 'डाला सजाओ' प्रतियोगितायां ऋतु मिश्रा प्रथमस्थानं, बीनू चौधरी द्वितीयस्थानं तथा सीमा झा तृतीयस्थानं प्राप्तवत्यः। श्रेष्ठनर्तकी पुरस्कारः प्रीति प्रियायै तथा श्रेष्ठव्यक्तित्वम् पुरस्कारः मीरा राय-महोदयायै प्रदत्तः। प्रतियोगितानां निर्णायिकारूपेण पूनम झा उपस्थिताऽऽसीत्।

मिथिला महिला समित्याः अध्यक्षा पूनम मिश्रा अवदत् यत् समित्या समये-समये मिथिलायाः संस्कृत्या सम्बद्धाः विविधाः कार्यक्रमाः आयोज्यन्ते। तदतिरिक्तं समाजोत्थानाय निर्धनेभ्यः साहाय्यप्रदानाय च विविधाः सेवाकार्यक्रमाः अपि सञ्चाल्यन्ते। कार्यक्रमस्य मञ्चसञ्चालनं बबिता झा अकरोत्। अस्मिन् अवसरे शीला मिश्रा, किरण मिश्रा, नमिता झा, रुबी ठाकुर, आशा झा, इन्दिरा झा, जयन्ती पाठक, चन्दा झा, लीला झा, आशा पाठक, डॉ. मञ्जु झा, ऋतु मिश्रा, अर्पणा झा, प्रेरणा ओझा, रञ्जना भगत, अलका झा, राजकुमारी झा, सविता मिश्रा, किरण झा इत्यादयः उपस्थिताः आसन्।

**रविः खरिडेहालः बेङ्गलूरु**

## "एआइ-यन्त्रेण पुस्तकानि सुपठितानि चेत् के चिन्तयन्तः"

पुस्तकानां क्षणिकसंश्लेषणं बुद्ध्या चिन्तनस्य प्रतिस्थापनं न भवति। बुद्ध्या चिन्तनेन सह सत्यावगमनं भवति। तत्स्थाने पुस्तकानि एआइ-यन्त्र-उत्पादनसामग्री-रूपेण उपयुज्यन्ते न तु शैक्षिकसाधनरूपेण । पुस्तकेषु ये विचाराः प्रसारिताः सन्ति तेषां अवगमनाय पुस्तकानां शारीरिकगुणाः अत्यावश्यकाः सन्ति । संरक्षणार्थं अङ्गीकरणस्य अभिप्रायः एआइ-व्यावसायिकीकरणस्य अभिप्रायात् भिन्नः अस्ति । बृहत्तरस्य सार्वजनिककारणानां कृते लाभः एआइ-मञ्चानां पक्षे उपेक्षितः भवति।

एतेन न्यूनं पठन्तः, न्यूनं प्रतिबिम्बयन्ति, न्यूनस्वतन्त्रचिन्तकाः इत्यादयः जनानां परम्परा उत्पद्यन्ते ।

**चलचित्रवार्ताः**

## पुनः बृहद्पटले दर्शनं दास्यतः सञ्जयदत्तः सलमानखानश्च, अरबीचलच्चित्रं '7 डॉग्स' भारतदेशे अस्मिन् दिने प्रदर्शितं भविष्यति



**हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई।**

चलच्चित्रजगतः प्रसिद्धौ अभिनेतारौ सलमानखानः सञ्जयदत्तश्च दीर्घकालात् परस्परं सुमित्रौ स्तः। तौ परस्परं भ्रातरौ इव मन्येते। अधुनापि बहुवारं ताभ्यां माध्यमानां पुरतः परस्परं भ्रातृभावस्य उल्लेखः कृतः अस्ति। उभाभ्यां सहैव अनेकासु चलच्चित्रेष्वपि अभिनयः कृतः अस्ति। 'साजन', 'चल मेरे भाई' तथा 'ये है जलवा' इत्येतासु चलच्चित्रेषु तौ सहैव दृष्टौ आस्ताम्। किन्तु वर्षे २००२ तमे प्रदर्शितस्य 'ये है जलवा' इति चलच्चित्रस्य अनन्तरं तौ पुनः बृहद्पटले सहैव न दृष्टौ। प्रशंसकाः तु इच्छन्ति यत् तौ पुनः एकवारं बृहद्पटले सहैव दृश्येयाताम्। अधुना तेषां इच्छा पूरिता भवितुं गच्छति।

चलच्चित्रजगतः प्रसिद्धौ सलमानखानः सञ्जयदत्तश्च '7 डॉग्स' इति चलच्चित्रे सहैव दृश्येते। एतत् अरबीभाषायां निर्मितं चलच्चित्रम् अस्ति, यस्मिन् उभाभ्यां कलाकाराभ्यां अतिथिभूमिकायां अभिनयः कृतः अस्ति। एतत् अरबीचलच्चित्रं कतिपयमासेभ्यः पूर्वं मध्यपूर्वदेशेषु प्रदर्शितम् आसीत्। अधुना तु भारतदेशेऽपि अस्य प्रदर्शनं भविष्यति। अलीकमेव सलमानखानेन सामाजिकमाध्यमे एकं दृश्यक्लिप् प्रकाशितं कृत्वा अस्य चलच्चित्रस्य प्रदर्शनतिथिः सूचिता। अगस्तमासस्य २१ दिनाङ्के एतत् चलच्चित्रं भारतदेशस्य चलचित्रगृहेषु प्रदर्शितं भविष्यति।

प्राप्तवार्तानुसारम्, अस्य चलच्चित्रस्य निर्माता सऊदी-अरबदेशस्य सामान्यमनोरञ्जनप्राधिकरणस्य अध्यक्षः तुर्की अल शेखः अस्ति। तेन सह सलमानखानस्य सञ्जयदत्तस्य च सुमधुराः सम्बन्धाः सन्ति। तयोः परस्परसौहार्दपूर्णसम्बन्धस्य कारणेन एव उभाभ्यां कलाकाराभ्याम् अस्मिन् चलच्चित्रे अतिथिभूमिकायाम् अभिनयः कृतः अस्ति।



एषः प्रभावः यावत् नालंदाविश्वविद्यालयस्य हानिः अपि तावत् अस्ति ।मानवबुद्धिं अप्रहतं कृत्वा प्रौद्योगिक्याः विषये अद्यतनं भवितुं प्रत्याह्वानं वर्तते।

# पाटलिपुत्र-ग्रीनफील्ड-सैटेलाइट-नगरिकायाम् ६५१ एकड्-परिमिते क्षेत्रे क्रीडा-केन्द्रस्य (स्पोर्ट्स हब) विकासः भविष्यति




## "पाटलिपुत्र-नगरिका भविष्यति विश्वस्तरीय-क्रीडा-सुविधाना केन्द्रम्" – नीतीशमिश्रः

पाटलिपुत्रम् राघवनाथझा। पाटलिपुत्र-ग्रीनफील्ड-सैटेलाइट-नगरिकायाम् (टाउनशिप) आधुनिक-विश्वस्तरीय-क्रीडा-संरचनायाः विकासाय नगरविकास-आवास-विभागस्य मन्त्रिणः श्रीनीतीशमिश्रस्य अध्यक्षत्वे एका उपवेशनं (बैठक) आयोजितम्। अस्मिन् उपवेशने क्रीडाविभागस्य मन्त्री सुश्री-श्रेयसी-सिंहः अपि उपस्थिता आसीत्। उपवेशने ग्रीनफील्ड-सैटेलाइट-नगरिकायाम् 'स्पोर्ट्स सिटी' (क्रीडानगरी) इत्यस्य विकाससहितं विविध-क्रीडा-सुविधानाम् प्राविधानेषु विस्तृतः विचार-विमर्शः कृतः। श्रीमिश्रः उक्तवान् यत् माननीयस्य मुख्यमन्त्रिणः श्रीसम्राट्-चौधरी-महोदयस्य दूरदर्शिनि नेतृत्वे बिहारस्य यूनां क्रीडाक्षेत्रे अग्रेसरत्वाय, स्वप्रतिभायाः परिष्काराय तथा च राष्ट्रिय-अन्तर्राष्ट्रियस्तरे उत्कृष्टप्रदर्शनार्थं निरन्तरं प्रोत्साहनं दीयते। अनेनैव उद्देश्येन राज्ये विश्वस्तरीय-क्रीडा-संरचनायाः विकासः क्रियते, येन क्रीडकेभ्यः श्रेष्ठ-प्रशिक्षणाय, अभ्यासाय तथा च स्पर्धायै आधुनिकाः सुविधाः उपलब्धाः भवेयुः।

श्रीमिश्रः अस्मिन् विषये सूचितवान् यत् पाटलिपुत्र-ग्रीनफील्ड-सैटेलाइट-नगरिकायाः एकीकृतायां योजनायां क्रीडा-गतिविधिभ्यः क्रीडा-संरचनायै च आहत्य (कुल) ६५१ एकड्-परिभूम्याः प्रावधानं कृतमस्ति। अस्याः अन्तर्गतम्:

### प्रायः २२५ एकड्-परिमिते क्षेत्रे स्पोर्ट्स सिटी
### १८७ एकड्-परिमिते क्षेत्रे गोल्फ कोर्स

२३९ एकड्-परिमिते क्षेत्रे आधुनिक-स्पोर्ट्स-कॉम्प्लेक्स (क्रीडा-सङ्कुलम्) विकसितुं प्रस्तावः अस्ति।

प्रस्तावितायां क्रीडानगर्यां विविध-क्रीडाभ्यः अत्याधुनिक-सुविधानाम्, प्रशिक्षणस्य, प्रतियोगितायाः च कृते आवश्यकाधारभूत-संरचनानाम् तथा च क्रीडकानुकूल-सुविधानाम् विकासे विशेषः भरः दास्यते। अपरञ्च क्रीडा-सङ्कुलस्य माध्यमेन नगरिकायाम् विविधानाम् क्रीडा-गतिविधीनाम् कृते व्यापकाः आधुनिकाः च सुविधाः प्रदातुम् योजना अस्ति। सुश्री-श्रेयसी-सिंहः अस्मिन् विषये विशेषं बलं दत्तवती यत् पाटलिपुत्र-ग्रीनफील्ड-सैटेलाइट-नगरिका आधुनिक-नागरिक-सुविधाभिः सह-सह उत्कृष्ट-विश्वस्तरीय-क्रीडा-संरचनाभिः युक्ता एका भविष्योन्मुखी नगरिका इति रूपेण विकसिता भवेत्। सा उक्तवती यत् प्रस्ताविताः क्रीडा-सुविधाः 'ओलम्पिक'-मानकानुसारं विकसिताः भविष्यन्ति, येन बिहारे राष्ट्रिय-अन्तर्राष्ट्रियस्तरस्य क्रीडा-प्रतियोगितानाम् आयोजनाय समर्था आधारभूत-संरचना सज्जा भवेत् तथा च राज्यस्य प्रतिभावतां क्रीडकानाम् कृते विश्वस्तरीय-प्रशिक्षणस्य प्रतिस्पर्धायाश्च अवसराः उपलब्धाः भवेयुः।

सुश्री-श्रेयसी-सिंहः अवदत् यत् राज्यस्य सर्वासां १२ प्रस्तावितानां नगरिकाणां कृते क्रीडा-सुविधानाम् विकासाय आवश्यका भूमिः चिह्निता भविष्यति, येन प्रत्येकं नगरिकायां श्रेष्ठा क्रीडा-संरचना विकसिता भवेत्। अस्मिन् उपवेशने नगरविकास-आवास-विभागस्य प्रधानसचिवः श्रीविनयकुमारः, क्रीडाविभागस्य सचिवः श्रीदीपकआनन्दः, क्रीडाविभागस्य निदेशकः श्रीआरिफ-अहसनः, नगरविकास-आवास-विभागस्य अपरसचिवः श्रीमनोजकुमारः इति एतैः सह सम्बद्धविभागस्य अन्ये वरिष्ठाः अधिकारिणः उपस्थिताः आसन्।

# श्रीमताम् उमेशनेपाल (पुरुषोत्तमनेपाल)आचार्याणां जन्मनक्षत्रोत्सवे पद्यमयी काव्यसङ्गोष्ठी



(वत्सदेशराजशर्मा) हिमसंस्कृतवार्ता।

समस्तेभ्यः साहित्यानुरागिभ्यः, शास्त्ररसामृतपिपासुभ्यः, सुधीभ्यश्चातीव मोदप्रमोदपुरस्सरं साञ्जलिबन्धं निवेद्यते यत्, भारतगणराज्यस्य महामहिमराष्ट्रपतिसमलङ्कृतानां, साहित्यशास्त्रपारावारावगाहिनां, मूर्धन्यमनीषिणां श्रीमताम् उमेशनेपाल(पुरुषोत्तमनेपाल)आचार्याणां मङ्गलमयं पावनजन्मनक्षत्रोत्सवमुपलक्ष्य अस्माकं पुण्यभूमेः नेपालदेशस्य पावनकाष्ठमण्डपनगर्यां (Kathmandu) वाग्देव्याः कश्चन ऐतिहासिकः, लोकोत्तरः सारस्वतमहोत्सवः समनुष्ठीयमानो वर्तते।

अस्य भव्यवाग्यज्ञस्य आयोजकाः सन्ति— काष्ठमण्डपे विराजितस्य श्रीवेङ्कटेशगुरुकुलस्य ते विद्याव्यसनिनः मेधाविनश्छात्राः, ये हि परमपूज्यस्वामिपुरुषोत्तमाचार्याणां साक्षादन्तेवासिनः भवितुं परमं सौभाग्यं दधति। अस्मिन् महोत्सवे प्रामुख्येन ऐतिहासिकछन्दोबद्धकविसङ्गोष्ठी इति कार्यक्रमस्य अभूतपूर्वा प्रस्तुतिः सम्पत्स्यते।

अस्य ऐतिहासिक-आयोजनस्य प्रमुखाणि लोकोत्तराणि च वैशिष्ट्यानि: अभूतपूर्वमञ्चसञ्चालनम् (गद्यप्रयोगविवर्जितम्): अस्य अनुष्ठानस्य सर्वोत्कृष्टं सर्वाधिकम् ऐतिहासिकं च वैशिष्ट्यमिदं विद्यते यत्, अतिथिस्वागतादारभ्य धन्यवादज्ञापनं यावत् सम्पूर्णमेव कार्यं केवलं महर्षिपिङ्गलप्रणीतेषु छन्दोबद्धश्लोकैरेव सुसम्पत्स्यते। आमन्त्रितकाव्य-हस्ताक्षराणि: संस्कृतनेपालीवाङ्मयगगनस्य देदीप्यमानानि नक्षत्राणि, लब्धप्रतिष्ठाः कवयः— श्रीमनोज भण्डारी, मुकुन्द लामिछाने, माधव घिमिरे, अनुप उप्रेती, तारानाथ पराजुली, नवीन गौतम, ओम्प्रकाश अवस्थिमहोदयाश्च मञ्चे स्वकीयां रसमयीं, भावपूर्णां, छन्दोबद्धकाव्यप्रस्तुतिं विधास्यन्ति। पाण्डित्यपूर्णं शास्त्रव्याख्यानम्: अत्र विद्वत्सभायां न्यायव्याकरणसाहित्यादिशास्त्रमहोदधिमन्थनोत्पन्नं ज्ञानामृतं परिवेषयन्तो मूर्धन्यविद्वांसः समुपस्थाय स्वकीयं पाण्डित्यपूर्णं, गम्भीरं, प्रामाणिकञ्च व्याख्यानं प्रदास्यन्ति।अयं खलु वाग्यज्ञः संस्कृतनेपालीवाङ्मयजगतः कृते कश्चन अद्वितीयः, ऐतिहासिकश्च कीर्तिमान् भविता। अत एव भवन्तः सर्वेऽपि शास्त्रकाव्यरसमर्मज्ञाः, वाग्देव्याः अनन्योपासकाः अस्मिन् अपूर्वे मणिकाञ्चनसंयोगे सोत्साहं समुपस्थाय कार्यक्रमस्य शोभां, सुरभारत्याः श्रियञ्च वर्धयिष्यन्तीति सप्रश्रयं सविनयं च निवेद्यते।

विनीताः / आयोजकाः श्रीवेङ्कटेशगुरुकुलस्य छात्रवृन्दाः काष्ठमण्डपः, नेपालः




# एआई-क्षेत्रे संस्कृतस्य सम्भावनाः

अद्यत्वे कृत्रिमबुद्धेः (AI) तथा प्राकृतिकभाषासंसाधनस्य (NLP) क्षेत्रे संस्कृतभाषायाः उपयोगिता सम्भावना च अतीव महती वर्तते। संस्कृतं न केवलं प्राचीनतमा भाषा, अपि तु अस्य व्याकरणं (विशेषतः पाणिनीयमष्टाध्यायी) पूर्णतः सुसम्बद्धं, नियमबद्धं, तर्कसङ्गतं च अस्ति। एषा संरचना सङ्गणकीय-तर्कशास्त्रस्य (Computational Logic) अनुकूलतमा अस्ति।संस्कृतस्य विशिष्टता अस्ति यत् अस्याः पदक्रमः (Word order) मुक्तः भवति, यः वाक्यस्य अर्थं न परिवर्तयति। एतेन भाषा-प्रसंस्करणात्मक-प्रक्रियासु (NLP processing) सङ्गणकाय अर्थावबोधः सुलभः भवति। वैज्ञानिकैः मन्यते यत् एआई-प्रतिरूपेभ्यः (AI models) ज्ञानसङ्ग्रहाय, यन्त्रअनुवादाय, भाषा-प्रशिक्षणाय च संस्कृतं सर्वोत्तमं माध्यमं भवितुमर्हति। अतः एआई-युगे संस्कृतस्य भविष्यम् अतीव उज्ज्वलम् अस्ति।